रचात् प्रसन्नागुड़सीधुपायी ॥ * ॥
भूयोऽनुबन्धे तु भवेद्विरेचो
मूत्रप्रसन्नादधिमण्डयुक्तैः” ॥ * ॥
द्विक्षत्तरं हिङ्गुवचाग्निकुष्ठं
सुवर्च्चिका चैव विड़ङ्गचूर्णम् ।
सुखाम्बुनानाहविसूचिकार्त्ति-
हृद्रोगगुल्मोर्द्ध्वसमीरणघ्नम् ॥ * ॥
वचाभयाचित्रकयावशूकान्
सपिप्पलीकातिविषान् सकुष्ठान् ।
उष्णाम्बुनानाहविमूढवातान्
पीत्वा जयेदाशु रसौदनाशी” ॥ * ॥
इति चिकित्सास्थाने षड्विंशेऽध्याये चरकेणोक्तम् ॥
सुश्रुतेनोत्तरतन्त्रे ५५ अध्यायेऽस्य सनिदानसम्प्राप्तिकं लक्षणं चिकित्सा चेति यदुक्तं तद्यथा ।
“अधश्चोर्द्ध्वञ्च भावानां प्रवृत्तानां स्वभावतः ।
न वेगान् धारयेत् प्राज्ञो वातादीनां जिजीविषुः ॥
वातविण्मूत्रजृम्भाश्रुक्षवोद्गारवमीन्द्रियैः ।
व्याहन्यमानैरुदितैरुदावर्त्तो निरुच्यते ॥
क्षुत्तृष्णा-श्वास-निद्राणामुदावर्त्तो विधारणात् ।
तस्याभिधास्ये व्यासेन लक्षणञ्च चिकित्सितम् ॥
त्रयोदशविधस्त्वासौ भिन्न एतैस्तु कारणैः ।
अपथ्यभोजनाच्चापि वक्ष्यते च यथापरः ॥
आध्मानशूलौ हृदयोपरोधं
शिरोरुजं श्वासमतीवहिक्काम् ।
कास-प्रतिश्याय-गलग्रहांश्च
बलासपित्तप्रसरञ्च घोरम् ॥
कुर्य्यादपानाभिहतः स्वमार्गौ
हन्यात् पुरीषं मुखतः क्षिपेद्वा ॥ १ ॥
आटोपशूलौ परिकर्त्तनञ्च
सङ्गः पुरीषस्य तथोर्द्ध्ववातः
पुरीषमास्यादथवा निरेति
पुरीषवेगेऽभिहते नरस्य ॥ २ ॥
मूत्रस्य वेगेऽभिहते नरस्तु
कृच्छ्रेण मूत्रं कुरुतेऽल्पमल्पम् ।
मेढ्रे गुदे वङ्क्षणमुष्कयोश्च
नाभिप्रदेशेष्वथवापि मूर्द्ध्नि ॥
आनद्धवस्तिश्च भवन्ति तीव्राः
शूलाश्च शूलैरिव भिन्नमूर्त्तेः ॥ ३ ॥
मन्यागलस्तम्भशिरोविकारा
जृम्भोपघातात् पवनात्मकाः स्युः ।
श्रोत्राननघ्राणविलोचनोत्था
भवन्ति तीव्राश्च तथा विकाराः ॥ ४ ॥
आनन्दजं शोकसमुद्भवं वा
नेत्रोदकं प्राप्तममुञ्चतो हि ।
शिरोगुरुत्वं नयनामयाश्च
भवन्ति तीव्राः सह पीनसेन ॥ ५ ॥
भवन्ति गाढ़ं क्षवथोर्विघाता-
च्छिरोऽक्षिनासाश्रवणेषु रोगाः ।
कण्ठास्यपूर्णत्वमतीवतोदः
कूजश्च वायोरथवा प्रवृत्तिः ॥ ६ ॥
उद्गारवेगेऽभिहते भवन्ति
जन्तोर्विकाराः पवनप्रसूताः ॥ ७ ॥
छर्द्देर्विघातेन भवेच्च कुष्ठं
येनैव दोषेण विदग्धमन्नम् ॥ ८ ॥
मूत्राशये वा गुदमुष्कयोश्च
शोफो रुजा मूत्रविनिग्रहश्च ।
शुक्राश्मरी तत्स्रवणं भवेद्वा
ते ते विकारा विहते तु शुक्रे ॥ ९ ॥
तन्द्राङ्गमर्द्दावरुचिः श्रमश्च
क्षुधोऽभिघातात् कृशता च दृष्टेः ॥ १० ॥
कण्ठास्यशोषः श्रवणावरोध-
स्तृष्णाभिघाताद्धृदये व्यथा च ॥ ११ ॥
श्रान्तस्य निश्वासविनिग्रहेण
हृद्रोगमोहावथवापि गुल्मः ॥ १२ ॥
जृम्भाङ्गमर्द्दोऽङ्गशिरोऽक्षिजाड्यं
निद्राभिघातादथवापि तन्द्रा” ॥ १३ ॥
अरिष्टलक्षणं यथा,
“तृष्णार्द्दितं परिक्लिष्टं क्षीणं शूलैरभिद्रुतम् ।
शकृद्वमन्तं मतिमानुदावर्त्तिनमुत्सृजेत् ॥
अस्य चिकित्सा यथा,
“सर्व्वेष्वेतेषु विधिवदुदावर्त्तेषु कृत्स्नशः ।
वायोः क्रिया विधातव्या स्वमार्गप्रतिपत्तये ॥
सामान्यतः पृथक्त्वेन क्रियां भूयो निबोध मे ।
आस्थापनं मारुतजे स्निग्धे स्विन्ने विशिष्यते ॥१॥
पुरीषजे तु कर्त्तव्यो विधिरानाहिको भवेत् ॥२॥
सौवर्च्चलाढ्यां मदिरां मूत्रेष्वभिहते पिबेत् ।
एलामप्यथ मद्येन क्षीरं वापि पिबेन्नरः” ॥३॥
“स्नेहस्वेदैरुदावर्त्तं जृम्भाजं समुपाचरेत् ॥४॥
अश्रुमोक्षोऽश्रुजे कार्य्यः स्निग्धस्विन्नस्य देहिनः ॥५॥
तीक्ष्णाञ्जनावपीड़ाभ्यां तीक्ष्णगन्धोपसिङ्घनैः ।
वर्त्तिप्रयोगैरथवा क्षवशक्तिं प्रवर्त्तयेत् ॥
तीक्ष्णौषधप्रधमनैरथवादित्यरश्मिभिः ॥६॥
उद्गारजे क्रमोपेतं स्नैहिकं धूममाचरेत् ।
सुरां सौवर्च्चलवतीं बीजपूररसान्विताम् ॥७॥
छर्द्याघातं यथा दोषं सम्यक् स्नेहादिभिर्जयेत् ।
सक्षारलवणोपेतमभ्यङ्गं वात्र दापयेत् ॥८॥
वस्तिशुद्धिकरावापचतुर्गुणजलम्पयः ।
आवारिनाशात् क्वथितं पीतवन्तं प्रकामतः ।
रमयेयुः प्रिया नार्य्यः शुक्रोदावर्त्तिनं नरम् ॥९॥
क्षुद्विघाते हितं स्निग्धमुष्णमल्पञ्च भोजनम् ॥१०॥
तृष्णाघाते पिबेन्मन्थं यवागूं वापि शीतलां ॥११॥
भोज्यो रसेन विश्रान्तः श्रमश्वासातुरो नरः ॥१२॥
निद्राघाते पिबेत् क्षीरं स्वप्याच्चेष्टकथारतः” ॥१३॥
अपरञ्च सनिदानसम्प्राप्तिकं लक्षणं चिकित्सा च ॥
“वायुः कोष्ठानुगो रूक्षैः कषायकटुतिक्तकैः ।
भोजनैः कुपितः सद्य उदावर्त्तं करोति हि ॥
वातमूत्रपुरीषासृक्कफमेदोवहानि व ।
स्रोतांस्युदावर्त्तयति पुरीषञ्चातिवर्त्तयेत् ॥
ततोहृद्वस्तिशूलार्त्तो गौरवारुचिपीड़ितः ।
वातमूत्रपुरीषाणि कृच्छ्रेण कुरुते नरः ॥
श्वासकासप्रतिश्यायदाहमोहवमिज्वरान् ।
तृष्णाहिक्काशिरोरोगमनःश्रवणविभ्रमान् ॥
लभते च बहूनन्यान् विकारान् वातकोपजान् ।
तत्तैललवणाभ्यक्तं स्निग्धं स्विन्नं निरूहयेत् ॥
दोषतो भिन्नवर्च्चस्कं शुक्तश्चाप्यनुवासयेत् ।
नचेच्छान्तिं प्रयात्येवमुदावर्त्तः सुदारुणः ॥
अथैनं बहुशः स्विन्नं युञ्ज्यात् स्नेहविरेचनैः ।
पाययेत त्रिवृत्पीलुयवानीरसपानकैः” ॥
“देवदार्व्वग्निकं कुष्ठं वचाम्पथ्यां प्रलम्बषाम् ।
पौष्कराणि च मूलानि तोयस्यार्द्धाढ़कं पचेत् ॥
पादावशिष्टं तत्पीतमुदावर्त्तं व्यपोहति” ।
घृतं यथा ।
“मूलकं शुष्कमार्द्रञ्च वर्षाभूः पञ्चमूलकम् ॥
आरेवतफलञ्चाप्सु पक्का तेन घृतम्पचेत् ।
तत्पीयमानं शमयेत् उदावर्त्तमशेषतः” ॥*॥
“चूर्णं निकुम्भकम्पिल्लश्यामेक्षाकग्निकोद्भवम् ।
लवणेधनमागध्यो लवनाणाञ्च साधयेत् ॥
गवां मूत्रेण ता वर्त्तीः कारयेत्तु गुदानुगाः” ।
वैद्यकरसेन्द्रसारसङ्ग्रहे यच्चिकित्सितं तद्यथा ॥
“त्रिकटुपारदं पथ्याकालकफलं द्विगुणं ।
थानकुलीनां स्वरसैर्गुड़िका कार्य्यान्तिरोक्ष्यास्तु ॥
प्रबलजलोदरगुल्मज्वरपाण्डामयनाशिनी ।
प्रोक्ता तिमिराणिपटलविद्रधिप्रबलोदावर्त्तहरी ॥
क्रिमिकोष्ठगात्रकण्डूपिड़काश्च निहन्ति शूलचयं ।
शुद्धगुड़िका कथिता भुवने श्रीवैद्यनाथाख्या” ॥
इति वैद्यनाथवटिका ॥ * ।
अथ अपथ्यानि यथा ।
“वमनं वेगरोधञ्च शमीधान्यानि कोद्रवम् ।
शालीतशाकं शालूकं जाम्बवं कर्कटीफलम् ॥
पिण्याकमालुकं सर्व्वं करीरं पिष्टवैकृतम् ।
विष्टम्भीनि विरुद्धानि कषायाणि गुरूणि च ॥
उदावर्त्ती प्रयत्नेन वर्जयेत् सततं नरः ।
इति वैद्यकपथ्यापथ्यविधिः ।)

उदासः, पुं, (उदस्यते इति । उत् + अस् + घञ् ।) उत्क्षेपः । उद्भावः । औदास्ययुक्ते, त्रि ॥

उदासीनः, पुं, (उदास्ते इति । उत् + आस् + शानच् + ईदास इति ईत्वम् ।) परतरः । इत्यमरः ॥ विजिगीषोः शत्रुमित्रभूमितो व्यवहितः व्यवहितत्वादेव नोपकारी नाप्यपकारी केवलमूर्द्ध्वमासीन इव । इति भरतः ॥ (यथा, मनुः ७।१५५।
“मध्यमस्य प्रचारञ्च विजिगीषोश्च चेष्टितम् ।
उदासीनप्रचारञ्च शत्रोश्चैव प्रयत्नतः” ॥
मण्डलभेदः । यथा, तत्रैव ७।१५८।
“अनन्तरमरिं विद्यादरिसेविनमेव च ।
अरेरनन्तरं मित्रमुदासीनं तयोः परम्” ॥
उपेक्षकः । यथा, —
“उदासीनवदासीनमसक्तं तेषु कर्म्मसु” । इति गीतायाम् ॥ ९ । ९ ॥)

उदास्थितः, पुं, ( उत् + आङ् + स्था + क्त । ) चरः । द्वारपालः । अध्यक्षः । इति हेमचन्द्रः ॥ प्रव्रज्यावसितः । नष्टसन्न्यासः । इति मेदिनी ॥

उदाहरणं, क्ली, ( उत् + आङ् + हृ + ल्युट् । ) दृष्टान्तः । तत्पर्य्यायः । उपोद्घातः २ उदाहारः ३ इति शब्दरत्नावली ॥ (यथा, माघे ।२।३३।
“प्रध्वंसितान्धतमसस्तत्रोदाहरणं रविः” ।
कथाप्रसङ्गः । कथनम् । यथा, कुमारे ।६।६५।